Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

संस्कृत-
# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १७ अङ्क : २०४
मे - २०२३

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### यत्र विचारः, तत्र विकासः

केनचित् चिन्तकेन रोमहर्षणं वाक्यम् उद्गीर्णम्। सः कथयति यत् एतत् विश्वं विचारैः निर्मितम् अस्ति। कथनम् अक्षरशः सत्यम् अस्ति। पशवः खलु मनुष्येभ्यः तेन कारणेन एव भिन्नाः दृश्यन्ते। यत्र विचारः अस्ति, तत्र विकासः अस्ति। अतः एव विभिन्नासु भाषासु वर्तमानाः उत्तमाः विचाराः सुज्ञस्य अनुवादकस्य लेखन्या प्रसारं प्राप्नुयुः। इयम् अद्यतनी साहित्यिकी आवश्यकता वर्तते। अत्र जनार्दनः हेगडे, डॉ. विश्वासः, राधावल्लभः त्रिपाठी इत्यादयः विद्वांसः महता प्रमाणेन योगदानं कृतवन्तः। साहित्ये अत्र तत्र दृश्यमानाः प्रकीर्णाः उत्तमाः विचाराः सानुवादं सङ्गृह्यन्ते चेत्, तैः पाठकाः एकत्र एव अमृतनिधिं प्राप्नुयुः। अत्र मया तथाविधाः केचन विचारबिन्दवः सिक्ताः। सुज्ञाः लेखकाः विस्तारयितुम् अर्हन्ति।

- ये शनैः चलन्ति, ते दूरं गच्छन्ति।
- उत्तमैः मित्रैः सह चलतः मनुष्यस्य कोऽपि मार्गः दीर्घः न भवति।
- यः मनुष्यः भवतः पुरतः परेषां निन्दां करोति, सः अन्येषां पुरतः भवतः अपि निन्दां करिष्यति।
- यत् सद्यः परिवर्तयितुं न शक्यते, तत् तु अस्माभिः सोढव्यम् एव।
- शिक्षकः द्वारम् उद्घाटयति, किन्तु प्रवेशः छात्रेण स्वयमेव कर्तव्यः।
- यः पृच्छति सः क्षणं मूर्खः भवति, यः कदापि न पृच्छति सः आजीवनं मूर्खः भवति।
- वार्द्धक्यं परिहर्तुं कोऽपि उपायः नास्ति, किन्तु वार्द्धक्यं श्रेष्ठैः कर्मभिः अलङ्कर्तुं शतशः उपायाः उपलभ्यन्ते।
- यदा गजः रुग्णः भवति तदा लघ्वी पिपीलिका अपि दंशनं कर्तुम् उपसर्पति।
- शत्रवे उचिते काले न दत्ता चपेटिका, व्यतीते काले अस्माकं कपोले एव पतति।
- परिपक्वं फलं स्वयमेव पतति इति सत्यम्, किन्तु तत् भवतः मुखे नैव पतिष्यति।
- आवश्यकवस्तूनाम् अवलोकनं कर्तव्यम्। ततः अधिकं सर्वमेव प्रकृतिविरुद्धम् अस्ति।
- यः शयनस्य अभिनयं करोति, तं कोऽपि जागरयितुं न शक्नोति।

# अपात्रदानम्

गङ्गाराम: दुर्गादासश्च सुहृदौ । तौ उभौ अपि उपाहारमन्दिरस्य स्वामिनौ । सद्गुणसम्पन्नौ तौ मैत्र्या: सारं जानीत: स्म । अत: तयो: विवाद: कदापि न जात: । तयो: तादृशीं मैत्रीं दृष्ट्वा ग्रामस्था: ज्येष्ठा: कलहायमानान् सहोदरान् बोधयन्ति स्म – ''गङ्गाराम–दुर्गादासौ दृष्ट्वा जीवने कथं व्यवहर्तव्यम् इति ज्ञातव्यं भवद्भि:'' इति ।

सङ्क्रान्त्युत्सवे तौ उभावपि वाणिज्यत: आगतं लाभांशं विभज्य स्वीकुरुत: स्म । तस्मिन् अवसरे गङ्गाराम: स्वस्य आये सार्धत्रिशतं रूप्यकाणि पृथक्कृत्य स्थापयति स्म । किन्तु दुर्गादास: तं – ''किमर्थम् एतानि ?'' इत्यादिकं न पृच्छति स्म । एतस्मिन् विषये गङ्गारामोऽपि आश्चर्यं प्राप्नोति स्म यत् किमर्थं दुर्गादास: मां किमपि न पृच्छति इति ।

प्रतिवर्षं ग्रामस्य सीमायाम् उत्सव: प्रचलति । तदा तत्र आगता: द्यूते, मदिरायां च आसक्ता: सन्त: सन्तोषेण दिनं यापयन्ति । उत्सवस्थलस्य समीपे किञ्चन शिखरं दृश्यते । शिखरस्य एकस्मिन् भागे कश्चन कूप: अस्ति । कूपं परित: उन्नता: वृक्षा: सन्ति इति कारणात् पथिकानां भोजनाय विश्रान्त्यै च योग्यं स्थलम् आसीत् तत् । प्रतिवर्षं तत्र आगन्ता गङ्गाराम: स्वेन पृथक्स्थापितं धनम् एकस्मिन् स्यूते संस्थाप्य कूपस्य समीपे तं स्यूतं त्यक्त्वा गच्छति । तत् धनं केन नीयते इति तेन न परिशील्यते स्म ।

कदाचित् गङ्गारामस्य मनसि जिज्ञासा उत्पन्ना यत् मया स्थाप्यमानं धनं क: स्वीकरोति इति ज्ञातव्यम् इति । अत: एकदा स: कूपस्य समीपे धनस्यूतं निक्षिप्य तत्रैव रहस्यरूपेण कुत्रचित् लीन: । तदा कश्चन स्वशिरसि प्रोञ्छं धृत्वा वृक्षाभ्यन्तरं गत: । तदा गङ्गाराम: कूपसमीपे स्वेन स्थापितं स्यूतं द्रष्टुं गत: । किन्तु स्यूत: तत्र नासीत् ।

वृक्षाभ्यन्तरं य: गत: तेनैव स्यूत: स्वीकृत: इति चिन्तयित्वा गङ्गाराम: तम् अनुसृतवान् । तस्य समीपं गत्वा स: अपश्यत् । स: आसीत् न अन्य:, अपि तु दुर्गादास: एव ।

तं दृष्ट्वा भ्रान्त: गङ्गाराम: – ''मया स्थाप्यमानं धनं कोऽपि दरिद्र: स्वीकरोति, तस्य साहाय्यं भविष्यति इति मया चिन्तितम् आसीत् । किन्तु तद् धनं भवत: हस्ते दृष्टवत: मम महत् दु:खं भवद् अस्ति'' इति उक्तवान् । दुर्गादास: मित्रस्य वचनं श्रुत्वा हसन् उक्तवान् – ''मित्र, भवता यदा धनं तत्र स्थापितं तदा एव तत् न भवदीयम् । तत् धनं येन केनापि स्वीकृतं भवेत् चेदपि परिणामे तु न कोऽपि भेद:'' इति । ''मया किमर्थं तत्र धनं स्थाप्यते इति यदि भवान् जानीयात् तर्हि एतादृशं वाक्यं भवत: मुखात् न नि:सरेत्'' इति वदन् गङ्गाराम: स्वकथां वक्तुम् आरब्धवान् –

''बाल्ये एव अहं मातापितृविहीन: अभवम् । दरिद्र: अहं स्वस्य उदरं पूरयितुं तादृशे बाल्ये एव अनेकानि कष्टानि अनुभूतवान् । एकदा दुर्भिक्षसमये ग्रामीणा: सर्वे ग्रामं त्यक्त्वा गतवन्त: । तदा एव अहमपि एतं ग्रामम् आगत: । तदा एतस्मिन् ग्रामे महान् उत्सव: प्रचलन् आसीत् । सङ्क्रान्तिदिवस: स: । आ चतुर्भ्य: दिनेभ्य: बुभुक्षया पीडित: अहं भिक्षां याचितवान् । किन्तु तेन किमपि प्रयोजनं न अभवत् । अत: अहं मधुरभक्ष्यापणे कस्मिंश्चित् लड्डुकं चोरितवान् । तदा आपणिक: मां दृष्ट्वा भृशं ताडितवान् । असहायकतया, बुभुक्षया, अपमानेन च पीडित: अहं प्राणान् त्यक्तुम् इच्छन् कस्यचित् कूपस्य समीपम् आगत: । तदा कूपस्य समीपे पादे किञ्चन वस्तु संलग्नम् । तत् गृहीत्वा अहम् अपश्यम् । सुवर्णमयम् अङ्गुलीयकम् आसीत् तत् । तत् दृष्टवत: मम जीवने उत्साह: पुन: आगत: । तत् अङ्गुलीयकं विक्रीय अहं महिषीं क्रीतवान् । तदा एव भवत: मैत्री अपि मया लब्धा । उपाहारमन्दिरवाणिज्येन उभाभ्याम् अपि लाभ: प्राप्त: । अत एव यत्र मया अङ्गुलीयकं प्राप्तं तत्र गत्वा सङ्क्रान्तिदिने सार्धत्रिशतं रूप्यकाणि रहस्यरूपेण स्थाप्यन्ते'' इति ।

कथां श्रुत्वा दुर्गादासः अवदत्– ''भवतः विचारः उत्तमः स्यात्। किन्तु भवता स्थापितं धनं येन प्राप्येत सः कुपथे गच्छेत्। एतं विषयं प्रत्यक्षतः अवगन्तुं शक्यते'' इति। ततः सः गङ्गारामं तस्य कूपस्य समीपं नीतवान्। तत्र दुर्गादासः लघुस्यूतमेकं कूपस्य समीपे क्षिप्तवान्। किञ्चित्कालानन्तरं वृद्धः कश्चन साधुः तत्र आगतः। कूपतः जलम् उद्धर्तुं सिद्धः सन् कूपसमीपं गतः सः तत्र पतितं स्यूतं दृष्टवान्। तं धनस्यूतं मत्वा सः सन्तोषेण स्वीकृतवान्।

अनन्तरक्षणे एव साधोः मनसि विचित्रा अनुभूतिः जाता। स्वेन उच्यमानं देवनाम त्यक्त्वा सः चतसृषु दिक्षु दृष्टिं प्रसारितवान्। ''एतावतां दिनानाम् अनन्तरं मम दरिद्रजीवनं समाप्तम् अभवत्। इतःपरम् अहं विवाहितः सन् सुखेन जीविष्यामि'' इति स्वगतं वदन् जलपानम् अपि विस्मृत्य सः ततः निर्गतवान्। गङ्गारामः एतत् सर्वं दृष्ट्वा साश्चर्यम् उक्तवान् – ''सर्वसङ्गपरित्यागी साधुः अपि अस्मिन् वयसि विवाहम् इच्छति किल'' इति।

'मौनेन स्थातव्यम्' इति हस्तसङ्केतेन दुर्गादासः गङ्गारामं सूचितवान्। ततः सः एकं रजतनाणकं कोशात् निष्कास्य कूपसमीपे क्षिप्तवान्। तदा परस्परं कलहायमानौ कौचन द्यूतकारौ तेन मार्गेण आगतौ।

तयोः एकः अपरम् उद्दिश्य – ''महिषीक्रयणार्थं मया आनीतं धनं भवान् द्यूते मत्तः व्ययीकारितवान्। एकं रूप्यकम् अपि न अवशिष्टं मत्समीपे इदानीम्। कथं गृहं गच्छानि ? तत्र जायमानम् अपमानं विचिन्त्य अहं भावयामि यत् प्राणत्याग एव वरम् इति'' इति वदन् कूपसमीपम् आगतः। अपरः तं निवारयितुम् इच्छन् पृष्ठतः धावितवान्। तावति काले पूर्वं गतेन रजतनाणकं लब्धम्। तत् नाणकं हस्ते स्वीकृत्य – ''उचिते समये मया धनं प्राप्तम्। प्रायः अनेन धनेन नष्टं सर्वं धनं पुनः प्राप्तुं शक्नुयाम्'' इति वदन् सः पुनः द्यूतगृहं प्रति धावितवान्।

''ममापि तस्मिन् धने भागः अस्ति'' इति उच्चैः वदन् अपरः अपि तस्य पृष्ठतः धावितवान्। एतत् दृष्ट्वा गङ्गारामः दुर्गादासम् उक्तवान् – ''मित्र ! अस्य व्यवहारं पश्यतु। एतेन द्यूते सर्वस्वम् अपि नाशितम्। तथापि इदानीं यत् एकं रूप्यकं लब्धं तदपि द्यूते नाशयितुं प्रवृत्तः दृश्यते एषः। किमेतत् ?'' इति। दुर्गादासः किमपि नोक्तवान्।

कश्चन कालः अतीतः। तदा कश्चन काष्ठविक्रयिकः काष्ठानि शिरसि वहन् कूपसमीपम् आगतः। दुर्गादासः किञ्चिद्धनयुक्तं स्यूतमेकं तस्य काष्ठविक्रयिकस्य मार्गे क्षिप्तवान्।

काष्ठविक्रयिकः – ''अहम् एतेषां काष्ठानां विक्रयणं कदा कुर्याम् ? कदा वा गृहं प्राप्नुयाम् ?'' इति स्वगतं वदन् कूपतः जलम् उद्धृत्य पूर्णोदरं जलं पीत्वा ततः वेगेन विपणिं प्रति गतः एव। ''अहो। किमेतत् ! मार्गे पतितं स्यूतं कटाक्षेणापि अपश्यन् सः पुरुषः गतः एव'' इति गङ्गारामः आश्चर्येण उक्तवान्।

''दृष्टं किल – भवता स्थापितेन धनेन कीदृशी हानिः जायते इति। अनायासेन धनं प्राप्यते चेत् जनैः तस्य धनस्य महत्त्वं न ज्ञायते। वृद्धस्य साधोः मनः अपि धनदर्शनेन परिवृत्तम् अभवत्। तेन साधुना तस्मिन् स्यूते धनम् अस्ति उत अन्यत् किमपि इत्यपि न दृष्टम्। तथैव रूप्यकं दृष्टवान् द्यूतकारोऽपि अनायासेन प्राप्तं धनं पुनः द्यूते एव विनियोक्तुं गतः। ये स्वश्रमेण प्राप्तेन धनेन सुखम् अनुभवन्ति ते अनायासेन प्राप्यमाणे धने निरासक्ताः एव भवन्ति। अतः एव काष्ठविक्रयिकः स्वस्य श्रमस्य फले एव लग्नः सन् पुरतः पतितं धनं कटाक्षेण अपि न दृष्टवान्'' इति दुर्गादासः उक्तवान्।

''तर्हि एतावत्पर्यन्तं मया कृतं दानं सर्वं जले क्षिप्तमिव व्यर्थम् अभवत् किम् ?'' इति पृष्टवान् गङ्गारामः।

तदा दुर्गादासः – ''नास्ति। तद् धनं मया सुरक्षितं स्थापितम्। तेन धनेन आवाम् उभावपि एकां पाठशालां निर्माय जनोपकारकं कार्यं करवाव'' इति उक्तवान्।

## अविमारकम् ( ग्रन्थपरिचयः )

व्योम शाहः

( अनुवर्तते)

सः उक्तवान् – ''न तथा। अयं केनाऽपि कारणेन स्वकीयम् अन्ययं कुलं च आच्छादयति। तस्य रूपं दिव्यं, तेजः क्षत्रियस्य इव, वाक्यं ब्रह्मसदृशं च वर्तते। अतः अयं शूद्रो नास्ति इति।'' नृपः परीक्षणं कर्तुं पुनरपि तम् आदिशत्। कुरङ्गीनिमित्तं यः काशिराजस्य दूतः आगतः तं प्रति किं कर्तव्यमिति चिन्ता राजानं बाधते स्म। भूतिकः समाश्वासितवान् – ''महाराज – दूतशतानि  आगतानि आगमिष्यन्ति च। न तत्र कर्तव्यमिहाऽस्ति लोके कन्यापितृत्वं बहुवेदनीयम्। सर्वे नरेन्द्रा हि नरेन्द्रकन्यां मल्लाः पताकामिव तर्कयन्ति। पूर्वं सौवीरराजस्य दूतोऽपि आगतः। तदानीं सः ''कन्या अतिबाला'' इत्युक्त्वा प्रेषितः।

इदानीं द्वयोरपि काशिराजसौवीरराजयोः उचितः इति निश्चयार्थं नृपः अमात्यौ च चिन्तनं कुरुतः स्म। अन्ततः काशिराजदूतोऽपि पूजितः सत्कारितः च। ततः राजा कुरङ्गीम् आश्वासयितुं प्रयाणं करोति। सः राज्यभारविषये वदति –

**''धर्मः प्रागेव चिन्त्यः सचिवमतिगति प्रेक्षितव्या स्वबुद्ध्या**
**प्रच्छाद्यौ रागरोषौ मृदुपरुषगुणौ कालयोगेन कार्यौ।**
**ज्ञेयं लोकानुवृत्तं परचरनयनै मण्डलं प्रेक्षितव्यं**
**रक्ष्यो यत्नाद् इहाऽऽत्मा रणशिरसि पुनः सोऽपि नाऽवेक्षितव्यः॥''**

अनेन श्लोकेन प्रथमाङ्कस्य समाप्तिः भवति।

**द्वितीयाङ्कः** – द्वितीयाङ्कस्य पूर्वं प्रवेशकः वर्तते। विदूषकः चेटी च तत्र पात्रे। प्रथमं विदूषकः प्रविश्य विज्ञापयति यत् कस्यचिद् ऋषेः शापवशात् अविमारकः अन्त्यजः (शूद्रः) इव वसति। किन्तु यदा सः राजकुमारीं दृष्टवान्, ततः आरभ्य सः केनाऽपि सह वार्तालापं कर्तुं नेच्छति। ततः चेटी प्रविश्य नगरदर्शनस्य स्वीयाम् इच्छां प्रकटीकरोति। उभयोः चेटीविदूषकयोः विनोदपूर्णः संवादः भवति। तौ निष्क्रामतः। अपरस्मिन् दृश्ये उपविष्टः अविमारकः। सः नितरां कुरङ्ग्याः रूपेण मोहितः सन् न अन्यद् चिन्तयितुं समर्थः।

**''दृष्टिः तदाप्रभृति नेच्छति रूपम् अन्यद् बुद्धिः प्रहृष्यति विषीदति च स्मरन्ती।**
**पाण्डुत्वमेति वदनं तनुतां शरीरं शोकं व्रजामि दिवसेषु निशासु मोहम्॥''**

तस्य मनः वशे नास्ति।

मञ्चस्य अपरस्मिन् भागे धात्री नलिनिका च प्रविशतः। ते राजकुमार्याः कुरङ्ग्याः विषये स्वीयां मनोव्यथां प्रकुटीकुरुतः स्म। धात्री कथयति यत् – ''तं तरुणं दृष्ट्वा कुरङ्ग्याः स्थितिः न सम्यक्। सा गोष्ठीजनैः सह न क्रीडति। कथितं न जानाति। गूढं हसति। एकाकिनी रोदिति '' इति। ते परस्परं जल्पतः स्म यत् तादृशैः गुणैः युक्तः कः अकुलीनः भवेत् इति। तदानीं ध्वनिः श्रूयते यत् ते कुलस्य शङ्कां परित्यज्य स्वकार्यं साधयेताम्। नलिनिका कथयति यत् कुरङ्ग्याः अपूर्वेण सौन्दर्येण कामदेवोऽपि क्लेशम् अनुभवति, कः खलु अयं मनुष्यः।

एवंविधं संलापं कुर्वत्यौ ते अविमारकस्य आवासं प्राप्ते । ते तस्य गृहे प्रविशतः । अविमारकः इतोऽपि मुग्धावस्थायाम् एव वर्तते । धात्री-नलिनिकाभ्यां पुनःपौन्येन सम्बोधितेऽपि सः कुरुङ्ग्याः रूपस्य वर्णने एव मुग्धः । उभे परस्परं वदतः स्म । तदानीम् एव अविमारकस्य दृष्टिपातः तयोः भवति । अविमारकः स्वागतं व्याहरति कुशलवार्तां च पृच्छति । धात्री कथयति यत् कुरुङ्गी अपि तादृशेन एव दुःखेन पीडाम् अनुभवति । सा कथयति यत् कुरङ्गीनिमित्तम् आगतः दूतः पूजितः प्रस्थितः च । सा तं कन्यान्तःपुरे प्रवेशं कर्तुं सूचयति तत्र च प्रवेशे क्लेशान् प्रस्तौति । अर्धरात्रे प्रवेक्ष्यामि इत्युक्त्वा खासः ते अपगमयत् । तदानीमेव विदूषकः प्रविशति । सः निर्गम्यमाने धात्रीनलिनिके पश्यति वयस्यम् अविमारकं तयोः आगमनस्य हेतुं च पृच्छति । सः सर्वम् अपि वृत्तान्तं वर्णयति । सः कथयति यत् तेन अर्धरात्रे कन्यान्तःपुरं प्रवेष्टव्यम् ।

विदूषकः कुन्तिभोजस्य अमात्यानां विषमशीलतां वयस्याय निवेदयति । तदा सः स्वीयं पराक्रमं वर्णयन् कथयति - "अहं बहून् अपि शत्रून् सैन्यसहितान् हतवान् । पुरा अहम् अविरूपधारिणम् असुरं हतवान् अतः मनुष्यमात्रेभ्यः कुतः भयम्: ? विदूषकः कथयति यत् सः तेन सह कन्यान्तःपुरे प्रवेक्ष्यति । अविमारकः प्रतिवदति -

**"एकः परगृहं गच्छेद् द्वितीयेन तु मन्त्रयेत् ।**
**बहुभिः समरं कुर्याद् इत्ययं शास्त्रनिर्णयः ॥"**

ततः अर्धरात्रं यावत् अविमारकः विदूषकः च एकस्य मित्रस्य गृहे तिष्ठतः ।

**(क्रमशः... )**

## मासवार्ता:

### आयोजितानि व्याख्यानानि



संस्कृतरसिकाः संस्कृतसाहित्यस्य शास्त्राणां च परिचयं प्राप्नुयुः इति विचार्य एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं चेरिटेबल ट्रस्ट इत्यनयोः संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः आयोजनं क्रियते । आयोजनेऽस्मिन् एप्रिलमासस्य १ दिनाङ्के डॉ. गिरधरभाई उपाध्यायः (कथाकारः) ब्रह्मवैवर्तपुराणविषये, एप्रिलमासस्य ८ दिनाङ्के श्रीरामेश्वरदासः हरियाणी (कथाकारः) लिङ्गपुराणविषये, एप्रिलमासस्य २२ दिनाङ्के डॉ. ईश्वरः मेहरा मध्यमव्यायोगः इति विषये च व्याख्यानम् अकुर्वन् । व्याख्यानानां श्रवणेन सर्वेऽपि श्रोतारः सन्तुष्टाः आसन् ।

## कृपया हसन्तु

कश्चन भिक्षुकः १०० रूप्यकाणि प्राप्तवान् । सः तानि गृहीत्वा भोजनालयम् अगच्छत् । तत्र सः पूर्णोदरं भोजनम् अकरोत् । आहत्य भोजनशुल्कं १५०० रूप्यकाणि अभवत् । "मम समीपे एतावत् धनं नास्ति" इति सः भोजनालयस्य प्रबन्धकम् अवदत् । एतत् श्रुत्वा प्रबन्धकः तं भिक्षुकम् आरक्षकाधिनम् अकरोत् । भिक्षुकः आरक्षकाय १०० रूप्यकाणि दत्त्वा आत्मानम् अमोचयत् । एतत् एव उच्यते वित्तप्रबन्धनम् ।

★ ★ ★ ★ ★

वित्तकोशाधिकारी - (नमनम् उद्दिश्य) अद्य धनं समाप्तमस्ति । श्वः आगच्छतु ।

नमनः - (क्रोधेन) किन्तु अहं मम धनम् अद्यैव इच्छामि ।

अधिकारी - भोः ! कोपः मास्तु । कृपया शान्त्या वार्तालापं करोतु ।

नमनः - अस्तु । आह्वयतु शान्तिम् । अद्य तु तया सह एव वार्तालापं करिष्यामि ।

★ ★ ★ ★ ★

शिक्षिका - (रमणम् उद्दिश्य) एतावन्ति दिनानि कुत्र आसीः त्वम् ? किमर्थं विद्यालये अनुपस्थितः आसीः ?

रमणः - महोदये, मम 'बर्ड फ्लू' इति रोगः आसीत् ।

शिक्षिका - किन्तु, रोगोऽयं पक्षिषु भवति न तु मनुष्येषु ।

रमणः - भवती तु मां सदा वर्गे कुक्कुटं करोति । भवती मां कदा मनुष्यः इति मन्यते ?

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम् ।**
**शास्त्रपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ॥**

**तात्पर्यम्** – नेत्राभ्यां सम्यक् दृष्ट्वा पदं स्थापनीयम्। वस्त्रेण संशोध्य जलं पातव्यम्। शास्त्रज्ञानेन परीक्ष्य एव वक्तव्यम्। मनसा अङ्गीकृतं कार्यमेव करणीयम्।

**धनमस्तीति वाणिज्यं भूमिरस्तीति कर्षणम् ।**
**सेवा न किञ्चिदस्तीति भिक्षा नैव च नैव च ॥**

**तात्पर्यम्** – यदि पुरुषस्य समीपे पर्याप्तं धनम् अस्ति तर्हि सः वाणिज्यं कुर्यात्, यदि किञ्चित् भूमिः अस्ति तर्हि कृषिकार्यं कुर्यात्, यदि किञ्चिद् अपि धनं नास्ति तर्हि सेवाकार्यं (वृत्तिम्) कुर्यात्, परन्तु भिक्षां कृत्वा जीवनं न यापयेत्।

**धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।**
**सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥**

**तात्पर्यम्** – ज्ञानिना स्वस्य धनं जीवितं च परार्थाय एव अर्पणीयम्। यतः ऐश्वर्यं जीवनञ्च न हि शाश्वतम्। एवं स्थिते उत्तमकारणाय एव त्यागः योग्यः भवति।

## ज्ञानसरित्

श्यामः पटेलः

**अफ्रिकामहाद्वीपस्य वन्यपशुः 'झिब्रा'**



अफ्रिकामहाद्वीपस्य केन्या, इथोपिया, सोमालिया प्रभृतिषु देशेषु तृणाच्छादितानि वनानि भवन्ति । तत्र अयं 'झिब्रा' आख्यः पशुः स्ववर्णवैशिष्ट्यत्वात् नयनगोचरः भवति । तस्य शरीरस्य उपरि स्थितानां कृष्णवर्णस्य श्वेतवर्णस्य च रेखानां रहस्यं न ज्ञातम् इतोऽपि । एते पशवः दर्शनेन अश्वतराः इव भान्ति । तेषां शरीरस्य द्विवर्णीयाः रेखाः तृणाच्छादितेषु वनेषु आत्मानं गोप्तुं साहाय्यं कुर्वन्ति । अस्माकं कृते तु सर्वे 'झिब्रा'-पशवः समानाः एव दृश्यन्ते । किन्तु एतेषां सर्वेषां शरीरस्य उपरि रेखानां स्थितिः समाना न भवति । प्रत्युत विभिन्ना भवति । यद्यपि एताः रेखाः भिन्नाः भवन्ति तथापि तेषाम् अपत्यानि स्वां जननीं सद्यः न अभिज्ञातुम् अर्हन्ति ! तत्र अस्माकं का गतिः ! झिब्रा-पशोः अपत्यं जन्मनः दशनिमेषेषु एव स्वपादानाम् उपरि स्थातुं शक्नोति । तथा च एकघण्टानन्तरं तु धावति । एते झिब्रा-पशवः तृणभोजिनः सन्ति । हिंसकैः वन्यपशुभिः एते झिब्रा-पशवः खेट्यन्ते । अतः शीघ्रं धावनं तेषां कृते अनिवार्यम् । तृणाच्छादितेषु क्षेत्रेषु एते एकीभूय निवसन्ति । तादृशाः सर्वे समूहाः निश्चितेषु प्रदेशेषु एव वसन्ति । एते जलपानेन विनापि दीर्घं कालं यापयितुं क्षमाः । सम्प्रति अफ्रीकामहाद्वीपे एषां सङ्ख्या न्यूनतां प्रति यान्ती अस्ति ।

अश्वतरः - mule, गोप्तुम् - for protecting, खेट्यन्ते - खाद्यन्ते

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **विलज्जत्वम्** | निर्लज्जता | shamlessness |
| **विजिगीषुः** | जीत के लिए इच्छुक | desirous for victory |
| **पक्षपातः** | अन्याय की सहाय करना | partiality |
| **उष्णकरः** | सूर्य | sun |
| **अनेहाः** | समय | time |
| **अनेकपः** | हाथी | elephant |
| **लिपिकरः** | लिखनेवाला | scribe |
| **फलेग्रहिः** | फलदायी | fritful |
| **चिरत्न** | चिरकाल से स्थित | ancient |
| **दीप्रः** | दीप्तिवान् | shining |
| **प्रत्यनीकः** | शत्रु | enemy |
| **अभीष्टः** | प्रिय | desired |
| **धूमरी** | कुहरा | mist |
| **पारीन्द्रः** | सिंह | lion |
| **पारेरकः** | तलवार | sword |

## किं भवन्तः जानन्ति ?

**१ ) एतेषु कः 'लम्बोदरः' कथ्यते ?**
(क) इन्द्रः (ख) विष्णुः (ग) शिवः (घ) गणेशः

**२ ) एतेषु कः देवः 'सर्पमाली' कथ्यते ?**
(क) वरुणः (ख) विष्णुः (ग) कुबेरः (घ) शिवः

**३ ) एतेषु कः महर्षिः 'समुद्रचुलुक' नाम्ना प्रसिद्धः आसीत् ?**
(क) अगस्त्यः (ख) भरद्वाजः (ग) वाल्मीकिः (घ) याज्ञवल्क्यः

**४ ) एतेषु देवेषु कस्य अपरं नाम 'मारुतः' इति वर्तते ?**
(क) वायोः (ख) वरुणस्य (ग) कुबेरस्य (घ) इन्द्रस्य

**५ ) कः देवः 'एकदन्तः' इति नाम्ना प्रसिद्धः वर्तते ?**
(क) शिवः (ख) इन्द्रः (ग) गणेशः (घ) विष्णुः

**६ ) एतेषु कः सृष्टेः कर्ता वर्तते ?**
(क) विष्णुः (ख) शिवः (ग) इन्द्रः (घ) ब्रह्मा

**७ ) सन्तकबीरस्य गुरुः कः आसीत् ?**
(क) रामानन्दः (ख) विवेकानन्दः (ग) दयानन्दः (घ) अखण्डानन्दः

उत्तराणि – (१) घ (२) घ (३) क (४) क (५) ग (६) घ (७) क

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## ग्रीष्मवर्गः

## संस्कृतभाषाशिक्षणम्

**Date :** 15/5/23 to 25/5/23
**Day :** Daily
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 2500/-

**(15 May 2023 to 25 May 2023)**

**बालसंस्कृतवर्गः**
(Class 1 to 8) 10am to 11:30am 2500/-

**(16 May 2023 to 30 May 2023)**

**संस्कृतव्याकरणम्**
(Class 9-10CBSE) 8am to 9:30am 3500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## छन्दःपरिचयः

**Date :** 17/5/23 to 9/6/23
**Day :** Wed-Fri
**Time :** 6:30pm to 8:00pm (IST)
**Fees :** 2500/-

## Admission Open 2023-24

**Value Education Through Sanskrit**

## बालसंस्कृतवर्गः

**(Class SKg to 8)**
**Online / Offline**

**Date :** 11/6/23 to 24/3/24
**Day :** Sunday
**Time :** 11:00am to 12:30pm (IST)
**Fees :** 7000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | | |
|---|---|---|
| वार्षिकं | रू | - 100 |
| द्वैवार्षिकं | रू | - 175 |
| त्रैवार्षिकं | रू | - 250 |
| अङ्कमूल्यं | रू | - 10 |

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006